नगराणाम् – पूर्वस्मिन् पाटलिपुत्रे भवः पूर्वपाटलिपुत्रकः। अपरपाटलिपुत्रकः। पूर्वकान्यकुब्जः। अपरकान्यकुब्जः।

ग्रामत्वादेव नगराणामपि [1]ग्रहणे सिद्धे [2]भेदेन यदुभयोरुपादानं तत् सम्बन्धभेदप्रतिपत्त्यर्थम्। दिक्पूर्वपदो हि समुदायः पूर्वेषुकामशम्यादिः ग्रामनामधेयम्। पाटलिपुत्रादिः पुनरुत्तरपदमेव नगरमाह। तत्र ग्रामवाचिनामङ्गानामवयवस्य दिक्शब्दादुत्तरस्य नगरवाचिनामुत्तरपदानामवयवस्य च वृद्धिर्भवति इत्येवमभिसम्बन्धः क्रियते। इतरत्र तु दिश उत्तरेषां नगराणाम् इत्येव। पूर्वेषुकामशमः इत्येवमादिषु कृतायामुत्तरपदवृद्धौ एकादेशो भवति इति ज्ञापित 'नेन्द्रस्य परस्य' (७.३.२२/१२४०) इति प्रतिषेधेन॥

## सङ्ख्यायाः संवत्सरसङ्ख्यस्य च। (१५/१७६२)

सङ्ख्याया [3]उत्तरपदस्य संवत्सरशब्दस्य सङ्ख्यायाश्च अचामादेरचः स्थाने वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः। द्वौ संवत्सरावधीष्टो भृतो भूतो भावी वा द्विसांवत्सरिकः[4]। सङ्ख्यायाः – द्वे षष्टी अधीष्टो भृतो भूतो भावी वा द्विषाष्टिकः[5]। द्विसाप्ततिकः[6]। द्विषष्ट्यादिशब्दो वर्षेषु संख्येयेषु वर्तमानः कालाधिकारविहितं प्रत्ययमुत्पादयति। 'परिमाणान्तस्यासञ्ज्ञाशाणयोः' (७.३.१७/१६८३) इत्येव सिद्धे संवत्सरग्रहणं [7]परिमाणग्रहणे कालपरिमाणस्याग्रहणार्थम्। तेन द्वैसमिकः, त्रैसमिकः इति उत्तरपदवृद्धिर्न भवति। द्विवर्षा, त्रिवर्षा माणविका इति अपरिमाणबिस्ताचित (४.१.२२/४८०) इति पर्युदासो न भवति॥

## वर्षस्याभविष्यति। (१६/१७६४)

सङ्ख्याया [8]उत्तरस्य वर्षशब्दस्य अचामादेरचः वृद्धिर्भवति तद्धिते ञिति, णिति, किति च[9] परतः, स चेत् तद्धितो[10] भविष्यत्यर्थे न भवति। द्वे वर्षे अधीष्टो भृतो भूतो वा द्विवार्षिकः। त्रिवार्षिकः। अभविष्यति इति किम्? यस्य त्रैवर्षिकं धान्यं निहितं भृत्यवृत्तये, अधिकं वापि विद्येत, स सोमं पातुमर्हति। त्रीणि वर्षाणि भावी इति त्रैवर्षिकम्। अधीष्टभृतयोरभविष्यति इति प्रतिषेधो न [11]भवति। गम्यते हि तत्र भविष्यत्ता, न तु तद्धितार्थः। द्वे वर्षे अधीष्टो भृतो वा कर्म करिष्यति इति द्विवार्षिको मनुष्यः॥

## परिमाणान्तस्यासञ्ज्ञाशाणयोः। (१७/१६८३)

परिमाणान्तस्याङ्गस्य सङ्ख्यायाः परं [12]यदुत्तरपदं तस्याचामादेरचः वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः, सञ्ज्ञायां विषये शाणे चोत्तरपदे[13] न भवति। द्वौ कुडवौ प्रयोजनमस्य द्विकौडविकः। द्वाभ्यां सुवर्णाभ्यां क्रीतं द्विसौवर्णिकम्। 'विभाषा कार्षापणसहस्राभ्याम्' (५.१.२९/१६९४) इत्यत्र 'सुवर्णशतमानयोरुपसङ्ख्यानम्' (वा. ५०५) इति लुको विकल्पः। द्वाभ्यां निष्काभ्यां क्रीतम् 'द्वित्रिपूर्वान् निष्कात्' (५.१.३०/१६९५) द्विनैष्किकम्[14]। असञ्ज्ञाशाणयो इति किम्? [15]पाञ्चलोहितिकम्। पाञ्चकलापिकम्। पञ्च

---

1. ग्रहणे नास्ति क. 2. भेदेन नास्ति क. 3. उत्तरस्य क. 4. त्रिसांवत्सरिकः इत्यधिकम् इ. ह. 5. त्रिषाष्टिकः इत्यधिकम् क.इ. 6. त्रिसाप्ततिकः इत्यधिकम् क.इ. 7. अन्यत्र इत्यधिकम् क. 8. उत्तरपदस्य ह. 9. प्रत्यये इत्यधिकम् क. 10. भविष्यति इत्यर्थे ह. 11. भविष्यति क.इ. 12. उत्तरपदस्य क. 13. परतः इत्यधिकम् क. 14. त्रिनैष्किकम् इत्यधिकम् इ.ड. 15. पाञ्चलौहितकम् क.